International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(6): 87-88
© 2018 IJSR
www.anantaajournal.com
Received: 20-09-2018
Accepted: 21-10-2018

**Moumita Chowdhury**
Currently Pursuing M.Phill in Sanskrit, in The Department of Sanskrit, West Bengal State University, Working as Guest Lecturer in the Department of Sanskrit, R.B.C College, Naihati, West Bengal, India

**Correspondence**
**Moumita Chowdhury**
Currently Pursuing M.Phill in Sanskrit, in The Department of Sanskrit, West Bengal State University, Working as Guest Lecturer in the Department of Sanskrit, R.B.C College, Naihati, West Bengal, India

# भरतनाट्यशास्त्रे रससूत्रविमर्शः

**Moumita Chowdhury**

## प्रस्तावना

अलङ्कारशास्त्रे भरतमुनिरेव प्राचीनतम आचार्यः, यस्य ग्रन्थः समुपलभ्यते। पाश्चात्यविद्वांसस्तदनुयायिनः केचन भारतीयविद्वांसश्च भरतं काल्पनिकव्यक्तिं मन्यन्ते। किन्तु भारतीयपरम्परा भरतमुनेरस्तित्वं स्वीकरोति। भरतप्रणीते नाट्यशास्त्रे यद्यपि मुख्यतया दृश्यकाव्यस्यालोचनायां पूर्णं तथापि श्रव्यकाव्यस्यापि बहुविधतत्त्वानि तेन प्रासङ्गिकरूपेणालोचितवान्। अलङ्कारशास्त्रे रसप्रस्थानस्य प्रणेतारूपेण स ज्ञातः। तेनोक्तम् – न हि रसादृते कश्चिदर्थः प्रवर्तते। रसोत्पत्तिप्रसङ्गे नाट्यशास्त्रस्य षष्टाध्याये भरतमुनिना रससूत्रमुक्तम् – विभावानुभावोव्यभिचारिसंयोगाद्रसनिष्पत्तिरिति। अस्माकं चित्तवृत्तेः कारणत्वेन विभावः। एतदपि द्विधा विभज्यते – आलम्बनविभावः, अर्थात् येनाश्रित्यास्माकं चित्ते भावोद्रेकं जायते। यथा दुष्यन्तस्य रतेरालम्बनविभावः शकुन्तला। अपरश्चोद्दीपनविभावोऽर्थात् यन् उद्रिक्तचित्तवृत्तेः परिपोषणार्थं सहायकम्। यथा वसन्तसमागमः, नृत्यगीतः, चन्द्रोदयश्च इत्यादि। प्राचीनैरालङ्कारिकैरस्य सूत्रस्य चतुर्धा व्याख्यानं कृतम्। तथाहि लोल्लटस्योत्पत्तिवादः, शङ्कुकस्यानुमितिवादः, भट्टनायकस्य भुक्तिवादः, अभिनवगुप्तस्याभिव्यक्तिवादः।

## उत्पत्तिवाद

आचार्येण लोल्लटेन मीमांसामतमनुसृत्य सूत्रमिदं व्याख्यातम्। तथाहि आलम्बनेनोद्दीपनेन च विभावेन रस उत्पाद्यते। अनुभावैः कटाक्षादिभिः कार्यैः प्रतीतियोग्यो भवति। व्यभिचारिभिर्निर्वेदादिभिः सहकारिभिरुपचयं गच्छति। भरतसूत्रे निष्पत्तिशब्दस्यार्थोऽभूतप्रादुर्भावः। संयोगशब्देन विविधाः सम्बन्धाः उच्यन्ते। यथा विभावेन रसस्य सम्बन्धो जन्य-जनकभावः, अनुभावेन गम्य-गमकभावः, व्यभिचारिभावेन च पोष्य-पोषकभाव इति।

## अनुमितिवाद

भट्टशङ्कुकस्य रससिद्धान्तोऽनुमितिवाद इत्युच्यते। रसानुभूतिः सहृदयस्य चित्ते एव भवितुमर्हति। सहृदयेण स्थायिभावस्यानुमानमेव रसानुभूतिः। स्थायिभावोऽनुमाप्यः, विभावादयस्त्रयोऽनुमापकाः। अतएवात्र सम्बन्धोऽनुमाप्यानुमापकभावः। सूत्रे निष्पत्तिशब्दस्यार्थोऽनुमितिः। अस्मिन् अनुमाने नट एव पक्षः। इदञ्च नटविषयकं ज्ञानं चित्रे तुरगज्ञानवन्न प्रमा, न विपर्ययः, न संशयः, नापि सादृश्यज्ञानमेव। इदमेकमलौकिकं ज्ञानमेव।

### भुक्तिवाद

भट्टनायकस्य रससिद्धान्तो भुक्तिवाद इति कथ्यते। तस्य मते रसो नोत्पद्यते, नानुमीयते, नाभिव्यज्यते किन्तु भुज्यते एव। रसस्तु नात्मगत:, नापि परगत:। रसानुभूतेर्विश्लेषणार्थं भट्टनायकेन व्यापारत्रयं कल्पितम् – अभिधा भावना भोजकत्वं च। प्रथमं तावदभिधयार्थानामुपस्थितिर्भवति। द्वितीयेन भावनाव्यापारेण साधारणीकरणं जायते। तृतीयेन भोजकत्वव्यापारेण त्रिगुणात्मके चित्ते रजोगुणस्य तमोगुणस्य चाभिभवो भवति, सत्त्वगुणस्याविर्भावेनान्त:करणं स्वच्छं भवति, तत्र चार्थचैतन्यं निरतिशयं प्रकाशते।

### अभिव्यक्तिवाद

अभिनवगुप्तस्य रससिद्धान्तोऽभिव्यक्तिवाद इति कथ्यते। तस्य मते सूत्रे संयोगशब्दस्यार्थो व्यङ्ग्य-व्यञ्जकभाव:, निष्पत्तिशब्दस्य चार्थोऽभिव्यक्ति:। सहृदयस्यैव रसास्वादनयोग्यता वर्त्तते। रसस्य कारणं विभावादिकम्, कार्यं च रसानुभूति:। विभावादीनामपि सहृदयस्य चित्ते सामानाधिकरण्यं वक्तव्यम्। वाह्यस्यान्तरस्य च समावेशोऽभिनवगुप्तेन योगाचारबौद्धमतमनुस्त्य व्याख्यात:। चैतन्यस्यांशत्रयं वर्त्तते, सत्-चित्-आनन्दश्चेति। आत्मचैतन्यस्यानन्दावरकस्याज्ञानस्यापसारणमावरणभङ्गो वा रसानुभूतिरिति।

परिशेषेऽत्र वक्तुं शक्यते यदभिनवगुप्तस्य रससिद्धान्तो हि परवर्त्तिभिरालङ्कारिकैर्गृहीतम्। काव्यप्रकाशस्य टीकाकारो मणिभद्रसूरि: स्पष्टत उच्यते – सर्वस्वं हि रसस्यात्र गुप्तपदो विजानते।एतेन मतानुसारेण मुख्यतया सामाजिकरसस्यास्वादयिता। सामाजिकगतस्थायीभावेन काव्यवर्णितस्य विभावादे: सम्बन्धोभिव्यङ्ग्य-अभिव्यञ्जकभाव:। रसं हि काव्यमुख्यतात्पर्यविषयीभूतोऽर्थ:। कविचित्ते रसानुभूत्या काव्यं जायते। अत: सामाजिकचित्तस्य रसानुभूतत्वेन काव्यस्य पर्यवसान्। अतएव रसो हि काव्यस्य फलस्वरूपम्। तथाचोक्तम् –

यथा वीजाय भवेद्वृक्षो वृक्षात् पुष्पं फलं यथा।
तथा मूलं रसा: सर्वे तेभयोभावा व्यवस्थिता:॥
इति।

### सहायकग्रन्था


1. नाट्यशास्त्रम्, गाइकोयड़संस्करणम्
2. नाट्यशास्त्रम्, प्रसाद संस्कृत-हिन्दीटीकासहित, सत्यप्रकाशशर्मा
3. नाट्यशास्त्रम्, सुरेशचन्द्र: वन्द्योपाध्याय:, नवपत्प्रकाशनम्
4. नाट्यशास्त्र का इतिहास, ङ: पारसनाथ द्विवेदी
5. History of Sanskrit Poetics, P.V. Kane
6. History of Sanskrit Poetics, S.K. De